# Shri Krishnarjunabhyam Kritam Rudra Stotram

# શ્રીકૃષ્ણાર્જુનાભ્યાં કૃતં રુદ્રસ્તોત્રમ્

## Document Information

Text title : Shri Krishnarjunabhyam Kritam Rudra Stotram

File name : kRRiShNArjunAbhyAMkRRitaMrudrastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva | adhyAya 57/49-58||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# શ્રીકૃષ્ણાર્જુનાભ્યાં કૃતં રુદ્રસ્તોત્રમ્

નમો ભવાય શર્વાય રુદ્રાય વરદાય ચ ।
પશૂનાં પતયે નિત્યમુગ્રાય ચ કપર્દિને ॥ ૪૯॥

મહાદેવાય ભીમાય ત્ર્યમ્બકાય ચ શમ્ભવે ।
ઈશાનાય ભગઘ્નાય નમોઽસ્ત્વન્ધકઘાતિને ॥ ૫૦॥

કુમારગુરવે નિત્યં નીલગ્રીવાય વેધસે ।
વિલોહિતાય ધૂમ્રાય વ્યાધાયાનપરાજિતે ॥ ૫૧॥

નિત્યં નીલશિખણ્ડાય શૂલિને દિવ્યચક્ષુષે ।
હન્ત્રે ગોપ્ત્રે ત્રિનેત્રાય વ્યાધાય વસુરેતસે ॥ ૫૨॥

અચિન્ત્યાયામ્બિકાભર્ત્રે સર્વદેવસ્તુતાય ચ ।
વૃષધ્વજાય પિઙ્ગાય જટિને બ્રહ્મચારિણે ॥ ૫૩॥

તપ્યમાનાય સલિલે બ્રહ્મણ્યાયાજિતાય ચ ।
વિશ્વાત્મને વિશ્વસૃજે વિશ્વમાવૃત્ય તિષ્ઠતે ॥ ૫૪॥

નમો નમસ્તે સેવ્યાય ભૂતાનાં પ્રભવે સદા ।
બ્રહ્મવક્ત્રાય શર્વાય શઙ્કરાય શિવાય ચ ॥ ૫૫॥

નમોઽસ્તુ વાચસ્પતયે પ્રજાનાં પતયે નમઃ ।
નમો વિશ્વસ્ય પતયે મહતાં પતયે નમઃ ॥ ૫૬॥

નમઃ સહસ્રશિરસે સહસ્રભુજમન્યવે ।
સહસ્રનેત્રપાદાય નમોઽસઙ્ખ્યેયકર્મણે ॥ ૫૭॥

નમો હિરણ્યવર્ણાય હિરણ્યકવચાય ચ ।
ભક્તાનુકમ્પિને નિત્યં સિધ્યતાં નૌ વરઃ પ્રભો ॥ ૫૮॥

એવં સ્તુત્વા મહાદેવં વાસુદેવઃ સહાર્જુનઃ ।
પ્રસાદયામાસ ભવં તદા હ્યસ્ત્રોપલબ્ધયે ॥ ૫૯॥

ઇતિ મહાભારતે દ્રોણપર્વણિ ૫૭ અધ્યાયાન્તર્ગતં
શ્રીકૃષ્ણાર્જુનાભ્યાં કૃતં રુદ્રસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । દ્રોણપર્વ । અધ્યાય ૫૭/૪૯-૫૮॥

mahAbhArata . droNaparva . adhyAya 57/49-58..

Proofread by PSA Easwaran

---

*Shri Krishnarjunabhyam Kritam Rudra Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*